**Nathanael Fillmore**

## Plato's Lysis - अनुवादः

मां च वद - यदा कश्चन (212 b) कंचन प्रीणाति, तदा कः कस्य प्रियः भवति ? - प्रीणन् प्रीयमाणस्य, पीयमाणः वा प्रीणतः ? अथवा नैव कश्चन भेदः वर्तते ? इति Sokrates ।

अहं मन्ये, यत् न तयोः भेदः वर्तते इति Menexenos ।

किं मन्यसे ? यदि अन्यः जनः अन्यं जनं प्रीनाति, तर्हि उभौ इतरेतरं प्रियौ भवन्ति किं ? इति Sokrates।

एवं तावत् मम यतिः इति Menexenos ।

कथं तु इदं शक्यते ? न शक्यते यत् जनः यद्यपि केनापि प्रीयमाणः, तथापि प्रीणन्तं न प्रतिप्रीणाति ? इति Sokrates ।

शक्यते इति Monexenos ।

अपिच, इदं न शक्यते, यत् प्रीयमाणः प्रीणन्तं द्वेष्टि अपि ? यथा बहवः कामुकाः यद्यपि इष्टं प्रीणति, तथापि न (212 c) प्रतिप्रीयन्ते, अपि तु द्विष्यान्ते । न वा इदं सत्यं मन्यसे ? इति Sokrates.

सत्यं खलु इति Menexenos ।

ननु, ईद्दशे उदाहरणे, अन्यः प्रीणाति, अन्यः च प्रीयते इति Sokrates ।

आम् ।

तस्मात्, एतयोः कः कस्य प्रियः अस्ति ? अपि प्रीणन्, प्रतिप्रीयमाणः द्विष्यमाणः वा, प्रीयमाणस्य प्रियः ? अथवा, प्रीयमाणः प्रीणतः प्रियः किम् ? अथवा, ननु स्यात् यत् यदि उभौ इतरेतरं त प्रीनीतः, तर्हि उभौ न प्रियौ स्तः इति Sokrates ।

अन्ततम् उचितं प्रतिदृश्यते (212 d) ।

तेन इदानीम् आवयोः मतिः पूर्वमत्याः भिन्ना भवति । यतः पूर्वम् आवाम् अमन्यावहे यत् यदि एकः जनः अन्यं प्रीणाति, तर्हि उभौ जनौ प्रियौ भवतः । नु तु अमन्यावहे यत् यदि न उभौ प्रीणीतः, तर्हि उभौ न प्रियौ स्तः इति Sokrates ।

स्यात् इति Menexenos ।

ततः न किंचित् प्रीणतः प्रियं अस्ति, यदि न प्रतिप्रीणाति ।

न युज्यते ।

ततः, यान् अश्वाः न प्रीणन्ति, ते अश्वप्रियाः न भवन्ति । न च एवं खगप्रियाः कुक्कुरप्रियाः, मद्यप्रियाः, व्यायामप्रियाः वा । न वा अपि ज्ञानप्रियाः ये ज्ञानेन न प्रतिप्रीयन्ते । यथा कविः नाम Solon वदति, यत् "सुखितः सः यस्य सन्ति प्रियाः बालाः अश्वाः कुक्कुराः च सेना च" इति । अथवा कविः असत्यं वदति किं ? इति Sokrates ।

तैव अहं मन्ये इति Menexenos ।

ततः सत्यं वदति कविः ।

आम् ।

ततः तु - हे Menexenos - दृश्यते मत् यद्यपि कश्चन प्रीणन् जनः प्रीयमाणेन प्रतिप्रीयते द्विष्यते वा, तथापि प्रीयमाणः तस्य प्रियः भवति । यथा शिशून् यदा पितरौ दण्डयतः, (213a) तदा यद्यपि दण्डदुःखात् ते शिशवः पितरौ द्विष्युः, तथापि तस्मिन् कले, दण्डेभ्यः, विशेषतः पित्रोः प्रियाः स्युः इति Sokrates ।

यह्यं तु एवं दृश्यते इति Menexenos ।

तेन अनुमीयते यत् प्रीणन् एव प्रियः भवति, न तु प्रीयमाणः ।

एवम् ।

द्विष्यमानः च एन अरिः भवति, न तु द्विषन् ।

एनम् भाति । ततः यदि प्रीयमाणः एन (213 b) प्रियः, न तु प्रीणन्, तर्हि बहणः जनाः अरिभिः प्रीयन्ते, प्रियैः तु द्विष्यन्ते । अरीणां च प्रियः ते भवन्ति, प्रियाणां च अरयः एते । किंतु, हे प्रिय मित्र, तनु न शक्यते यत् कोपि जनः प्रियस्य अहिः भवेत् अथवा यत् कोपि अहेः प्रियः भवेत् इति Sokrates ।

सत्यं भवता उक्तं मन्ये इति Menexenos ।

ततः तु, यस्मात् एतत् न शक्यते, तस्मात् कोपि प्रीणन् प्रीयमाणस्य प्रियः भवितव्यः ।

भाति ।

द्विषन् च जनः द्विष्यमाणस्य अरिः भवति ।

आम् ।

तस्मात्, यत् पुर्वम् आवाभ्याम् उक्तं, तत् अन्ततम् अवश्यम् आवयोः संमन्तव्यं पुनः भवति । नाम, यत् बहुशः, (213 c) यदायदा अन्यः अन्यम् अप्रीणतं प्रीणाति, तदातदा सः अप्रियस्य प्रियः भवति । अपिच, यत् बहुशः, यदायदा अन्यः अन्यम् अद्विषन्तं द्वेष्टि, तदातदा सः अद्विषः द्विट भवति इति Sokrates ।

स्यात् इति Menexenos ।

एषः तु पक्षः पुर्वम् असत्यः आवाभ्याम् अनुमीयते । अथवा न स्मरसि ?

स्मरामि ।

ततः, यदि प्रीणन्तः जनः प्रियाः न भवन्ति, अपिरा प्रीयमाणाः जनाः प्रियाः न भवन्ति, अपिय प्रीणन्तः प्रीयमाणाः च जनाः न प्रियाः भवन्ति, तर्हि किं मन्येमहि ? कान् अन्यप्रकारान् जनान् प्रियान् इव कथितुं शक्नुमः ? इति Sokrates

हे Sokrates, नहि खलु जानामि अहम् ।

***